# APPENDICES

## APPENDIX 1A

A list* of Subhāṣitas from the play "Svānubhūti"

(१) अक्रियैव परा पूजा मौनमेव परो जपः।
अचिन्तैव परं ध्यानमनिच्छैव परं सुखम्॥ १.७९
(कस्यापि)

(२) अधीत्य विधिवद्वेदं शास्त्रं चाभ्यस्य यत्नतः
पुराणमपि चावेक्ष्य शान्तिं यो नाधिगच्छति।
स्वात्मानं च न जानाति नरो नासौ स गर्दभः॥ ५.३८

(३) अभिमानमात्रं हि जनोर्निखिलदुःखैकनिदानम्। 2/३८

(४) अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥ ३.८
केशटस्य।

(५) अलम्पटस्येह सुसङ्गतौ चे-
त्तवास्ति वाञ्छा तदिह क्षणेन।
भवेत्सदाऽखण्डरसस्य साध्वी
माध्वीकतस्तृप्तिरनन्यसाध्या॥ १.१४

(६) असन्त इव सन्तोऽपि कोपयन्ति परं नरम्।
निजक्षमागुणोदारपरीपाकं परीक्षितुम्॥ २.४३
(कस्यापि)

(७) अहो क्षणिकाल्पसुखसाधने जनो यतते न त्वखण्डा-
नन्दायेति महद्विस्मयास्पदम्। 3/५४

* The first figure before decimal point refers to the act and the figure after decimal point refers to stanza number. The numerator denotes act and the denominator shows page number e.g. $\frac{3}{54}$ = Act III page 54.

(८) अहो महत्कष्टमिदं यद्विदुषोऽपि दारिद्र्यं नाम। ३/५१
(९) कर्तव्यतायाः खलु लेशतोऽपि
क्लिश्नन्ति सद्यो गिमनांस्यवश्यम्।
समीरसङ्गादतिशीर्णभावं
प्रयान्ति पुष्पाणि शिरीषजानि ॥ ५.२६
(१०) कविरपि कश्चित्सदर्थमात्रदत्तदृष्टिः। ५/८३
(११) कार्यान्तरचुम्बिनि चेतसि सम्यगप्याभि-
धीयमानं न तत्पथमारोहति। समारोहति वान्यथा-
भावम्। १/११
(१२) किमसम्भावितं नामास्यां सृष्टौ। २/६९
(१३) कीरोऽपि किं किरति नेह जनस्य कर्णे
वर्णावलीमपरवक्त्रविनिस्सरन्तीम्।
किं तावता यदि तदर्थनिमग्नचित्तो
भूयात्तदा नु लभते पुरुषः प्रतिष्ठाम् ॥ २.४१
(१४) को नाम द्विजन्मा न श्रुतिधरो धरायाम्। ५/८२
(१५) को नाम न स्पृहयत्यात्मानन्दाय। ५/८४
(१६) को नाम मित्रोदयं नाभिवाञ्छति। ५/८९
(१७) को नाम विधातुर्नियतिमतिवर्तितुं समर्थः। ४/७९
(१८) को नाम सार्वभौमस्यापि सम्पदुपयोगः। ३/५३
(१९) को नाम सुमतिरद्वैतसाम्राज्ये नानुरज्येत। ४/७६
(२०) तनुं त्यजन्तु वा काश्यां श्वपचस्यापि वा गृहे।
ज्ञानसंप्राप्तिसमये मुक्तास्ते विगताशयाः ॥ ५.२७
(२१) दुस्तर्के विरतिश्चिरं श्रुतिशिरोभागे दृढा (कस्यापि) सन्मतिः
संसारेष्वरतिर्गुरावभिरतिः प्रीतिः सतां सङ्गमे।

स्याच्चेच्चेतसि वेतसोऽप्यतिनतिः शम्भोः पदाम्भोरुहे
भक्तिव्यक्तिरवश्यमेव परमाद्वैतस्य जन्तोर्भवेत् ॥ १.७४

(२२) देहोऽपि देवालय एव यस्मिन्
वर्वर्ति सर्वान्तरगो महेशः ।
पूजापि चास्याधिकसम्मतेयं
यदक्रिया चिन्मयताप्रदात्री ॥ १.७८

(२३) न चाध्यात्माभिमानोऽपि विदुषोऽस्त्यासुरत्वतः ।
विदुषोऽप्यासुरत्वं चेन्निष्फलं तत्त्वदर्शनम् ॥ २.१९
नैष्कर्म्यसिद्धिः १.७५

(२४) न दम्भाल्लोभाद्वा समदहृदयाद्वा विरचिता
चितः काचिद्वार्ता भवति भवनाशाय नियतम् ।
विदित्वैवं जन्तुः कृतसुकृतपाकाद्यदि रतिं
दधात्यात्मारामे भवति कृतकृत्यः खलु तदा ॥ १.९५

(२५) नानातीर्थजलावगाहनरतिं यज्ञक्रियासम्भृतिं
प्राणायामपरम्परापरिणतिं नासाग्रलक्ष्ये रतिम् ।
सर्वेषामथ सङ्गमेऽपि विरतिं कुर्वन्नु नैतावता
ब्रह्माद्वैतसुखैकदेशकणिकालाभो भवेन्निश्चितम् ॥ १.१९

(२६) नियतिरेव सर्वसंविधात्री । ४/७९

(२७) नोचितः सतां पाण्डित्यवत्ताभिमानः । २/३८

(२८) मायिनश्च प्रसादाच्चिदेकता । ५/८७

(२९) मालिन्यं विनिवारयत्यतितरां पुष्णाति कान्तिं तथा
धर्मं वर्धयते प्रसादमतुलं चित्ते विधत्ते भृशम् ।
जन्तोर्जाह्नवीमज्जनं वितनुते पापीयसोऽप्यादृतं
दूराद्वैकगतिं सतामिव समासङ्गः कलौ केवलम् ॥ ५.१.

(३०) मित्रक्षेत्रधनागारदारदायादसम्पदः।
स्वप्नेन्द्रजालवत्पश्य दिनानि त्रीणि पञ्च वा॥ ३.६
अष्टावक्रगीता, १०.२

(३१) मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज।
क्षमार्जवदयातोषसत्यं पीयूषवद्भज॥ ३.५
अष्टावक्रगीता, १.२

(३२) यथा कापि भगवती भागीरथी नानामुखैः सागरमनुप्रविष्टैवमेवाद्वैतविद्या संसारसागरं प्रविष्टेति। ४/७८

(३३) यथोपलानां शकलैः शिशूनामोंकारलिप्या प्रथमं हि शिक्षा।
तथैव जीवेश्वरचिद्विभागैर्जडस्य जन्तोरिति विद्धि तत्त्वम्॥ ३.३८.

(३४) यावदस्ति तावदबाधितमेव। ५/८

(३५) ये पुनरद्वैतापाराकूपारसुधारससारस्वादविरसाः संसारमरुमरीचिकापयःपानलोलसमानसास्ते न कथं सुमतिजनावहास्या भवेयुः। ४/७६

(३६) ये मात्सर्यवशाद्विशेषविदुषां त्यक्त्वा गुणानां गणान्
स्वात्मानं गणयन्ति गौतमगुरुं भट्टोद्भटं स्वे जने।
ते नो पण्डितशब्दयोगविषयः स्वात्मैकतानन्दभू-
रन्यः कोप्ययमद्भुतः सुजनताचूडामणिः पण्डितः॥ ५.३७

(३७) ये मूर्खाः खलु शिक्षिता अपि वदन्त्युष्ट्रादिशब्दे दृढं
दूरं चोटरमूटरान्विति भृशं ते भाजनं सम्पदाम्।
ये वा वेदतदङ्गशास्त्रकविता नानाकलाशालिन-
स्तेषां तद्व्यसनाशनादिषु पुनश्चिन्तातिर्जायते॥ ३.२

(३८) लालने ताडने मातुर्नाकारुण्यं यथार्भके ।
तद्वदेव महेशस्य नियन्तुर्गुणदोषयोः ॥ २.३०

(कस्यापि)

(३९) वारंवार विचारणेऽपि न मनाक् संसारवारांनिधौ
सारं क्वापि कदापि कैश्चिदपि वा दृष्टं न नो वा श्रुतम् ।
एवं सत्यपि ये निमग्नहृदयास्तस्मिंस्तु शब्दाश्रया-
त्सारप्राप्तिधिया न ते कथमहो हास्या भवेयुर्भृशम् ॥ ४.४४

(४०) विदितात्मतत्त्वस्य तु सर्वगततया सर्वोपयोगः । ३/५३

(४१) विद्वदनुभवेन सर्वमविरुद्धमबाधितं च । ५/९८

(४२) विनात्मानन्ददर्शनं क्व सानन्दता । ५/९८

(४३) व्यापारे खिद्यते यस्तु निमेषोन्मेषयोरपि ।
तस्यालसधुरीणस्य सुखं नान्यस्य कस्यचित् ॥ ५.२३
अष्टावक्रगीता, १६.४

(४४) श्रोतव्यः श्रुतिवाक्यतः शमदमाक्रान्तेन सच्चेतसा
मन्तव्योऽप्युपपत्तिभिर्मतिमता ध्येयो रहस्यादरात् ।
इत्येवं यदवोचि तत्खलु मते पाण्डित्यबाल्ये तथा
मौनं तत्र च मान्यमेति तदसौ स्याद्ब्राह्मणः सर्वथा ॥ २.१८

(४५) सगुणनिर्गुणयोः खलु सङ्गति-
र्भवति नैव चिरं रचिता हठात् ।
निजबलेन कलाकुशलेन चे-
त्तदपि हन्त धनुःशरयोरिव ॥ २.३.

(४६) सगुणापि हन्त विगुणा
भवति खलास्याद्विचित्रवर्णापि
आखुमुखादिव शाटी
पदपरिपाटी कवेः कापि ॥ १.५.

(४७) सङ्ख्यावतैकेन यथा प्रमोदो
भवत्यवश्यं सकलस्य जन्तोः।
सङ्ख्याविहीनैरपि नान्यलोकै-
स्तथेति तत्सङ्गतिरेव साध्वी ॥ १.१०

(४८) सङ्गः सर्वात्मना त्याज्यः स चेद्धातुं न शक्यते।
सद्भिः सह स कर्तव्यः सन्तः सङ्गस्य भेषजम् ॥ ४.१९
हितोपदेशः ४.९०

(४९) साद्भिः सदैव सकलस्य सुशिक्षणीयं
तेषां निजात्मकतया सकलैः कृतस्य।
स्यादेव तावदसतः फलभागिता य-
त्तस्मादपृष्टवचनेऽस्ति न कोऽपि दोषः ॥ २.१

(५०) सदोषमपि निर्दोषं भवत्यग्रे विपश्चितः।
रामस्येवार्जुनवपुः सुकवेः सरसं वचः ॥ १.६

(५१) सन्त्येव द्विरदास्तदेककवलप्रोल्लासभाजः परे
सिंहास्तद्बलगर्वभेदनपटुर्वर्वर्ति चाष्टापदः।
तस्मात्क्वापि कदापि किञ्चिदपि वा केनापि पुंसा सखे
दर्पावेशनिवेशिताशयतया स्यातुं न युक्तं जने ॥ २.४४

(५२) समग्रं वाग्जालं जगति जनितो जन्तुरतुलं
तनोतु प्रागल्भ्यं प्रथयतु धनं चार्जयतु वा।
विना स्वात्मारामोत्कटपरिचितिं नैव लभते
सुखं कारागाराधिकविषमसंसारसदने ॥ १.१६

(५३) साङ्गं वेदमधीत्य शास्त्रमपि वा व्याख्याय गाथास्तथा
काव्यं वाभिनवं विधाय विविधं भाषाप्रबन्धानपि।
कृत्वा किं भवति प्रतिष्ठितमतिः किं धारणावान् यतो
या ब्रह्माद्वयतावधारणपटुः सा धारणा धारणा ॥ २.४२

(५४) सुहृदालिङ्गनं सुधाकरकरनिकरपरिष्वङ्गतोऽपि महानन्दनिदानम्। २/२९

(५५) स्वयं ज्ञातेऽप्यर्थे विद्वांसो नियतं परसम्मतिमपेक्षन्ते स्वभ्रमसम्भावनया। ५/२८

## APPENDIX 1B

A list of Subhāṣitas from the play "Rasikavinoda".

(१) गीर्वाणानां नैसर्गिकः स्वभाव एव यद्दूरदानमिति। २/५

(२) ग्राम्यवर्णने ग्राम्या एव शब्दा भूषणत्वं भजन्ते। २/१२

(३) दीपात्प्रकाशः किल कज्जलं च
चन्द्रात्सदालोक उताङ्करङ्कः॥ ३.८ a&b

(४) दुर्मुखस्य दुर्मुखमेव स्थानं भवति। १/३

(५) पुरुषोत्तमसदृशं स्थानं पृथिव्यां नास्ति। ५/२१

(६) पुरुषोत्तमाश्रयं त्यक्त्वा कदाचनापि न गन्तव्यम्। ५/२६

o———xxx———o